श्रीगणेशायनमः॥ श्रीललितायनमः॥ अथगृह्यसूत्रप्रारंभः॥ अ
थातोगृह्यस्थालीपाकानांकर्मपरिसमुह्योपलिप्योल्लिख्योद्धृत्या
भ्युक्ष्याग्निमुपसमाधायदक्षिणतोब्रह्मासनमास्तीर्यप्रणीयप
रिस्तीर्य्यार्थवदासाद्यपवित्रेकृत्वाप्रोक्षणीः संस्कृत्यार्थवत्प्रोक्ष्य
२ । निरूप्याज्यमधिश्रित्यपर्य्यग्निकुर्य्यात्स्रुवंप्रतप्यसंमृज्याभ्यु
क्ष्यपुनःप्रतप्यनिदध्यादाज्यमुद्वास्योत्पूयावेक्ष्यप्रोक्षणीश्चपूर्व
वदुपयमनान्कुशानादायसमिधोभ्याधायपर्युक्ष्यजुहुयाद

चायायास्पग्नेर्वषट्कृतं यत्कर्मणात्यरीरिचं देवा गातुविद
इति बर्हिर्हुत्वा प्राश्नाति ततो ब्राह्मणभोजनं ॥२॥ षडर्घ्या
भवंत्याचार्य ऋत्विग्वैवाह्यो राजा प्रियः स्नातक इति प्रति
संवत्सरानर्हयेयुर्यक्ष्यमाणास्त्वृत्विज आसनमाहार्याह
२ साधु भवानास्तामर्चयिष्यामो भवंतमित्याहरंति विष्ट
रं पद्यं पदार्थमुदकमर्घमाचमनीयं मधुपर्कं दधिमधुघृत
मपिहितं कांस्ये कांस्येनान्यस्त्रिः स्त्रिः प्राह विष्टरा
२

ष:१एव विधिर्मंत्रकचिद्धोमः॥१३१८ आवसथ्याधानंदारकालेदाया
द्यकालएकेषांवैश्यस्यबहुपशोर्गृहादग्निमाहृत्यचातुःप्राश्य
पचनवत्सर्वमरणिप्रदानमेकेपंचमहायज्ञाइतिश्रुतेरग्न्याधे
यदेवताभ्यस्थालीपाकं॰श्रपयित्वाज्यभागाविष्ट्वाज्याहुतीर्जु
होतित्वन्नोअग्नेसत्वन्नोअग्नइमम्मेवरुणतत्वायामियेते
शतमयाश्चाग्नउदुत्तमंभवतन्नइत्यष्टौपुरस्तादेवमुपरिष्टा
स्थालीपाकस्याग्न्याधेयदेवताभ्योहुत्वाजुहोतिस्विष्टकृते॥

मभिगछत ॥ अरिष्टास्माकं वीरामापरासेचिमत्पयइत्याचाम
सामागंन्यशसासं स्रजवर्च्चसा ॥ तंम्माकुरुप्रियंप्रजानामधि
पतिंपश्रूनामरिष्टंतनूनामितिमित्रस्यत्वेतिमधुपर्कंप्रतीक्षे
तेदेवस्यत्वेतिप्रतिगृह्णातिसव्येपाणौकृत्वादक्षिणस्या
नामिकयात्रिःप्रयौति ॥ नमःश्यावास्यायन्नशनेयत्तआवि
द्धंतत्तेनिष्कृंतामीत्यनामिकांगुष्ठेनचत्रिर्निरुक्षयतितस्य
त्रिःप्राश्नाति ॥ यन्मधुनोमधव्यंपरमं॰रूपमन्नाद्यंतेना २

ना
दीनिविष्टरंप्रतिगृह्णातिवर्ष्मोस्मिसमानामुद्यतामिवसू
र्यः ॥ इमंतमभितिष्ठामियोमाकश्चाभिदासतीत्येनमु
भ्युपविशतिपादयोरन्यंविष्टरआसीनायसव्यंपादंप्रक्षा
ल्यदक्षिणंप्रक्षालयतिब्राह्मणश्चेद्दक्षिणंप्रथमंविराजो
दोहोसिविराजोदोहमशीयमयिपाद्यायैविराजोदोहइत्य
र्घ्यंप्रतिगृह्णात्यापस्थयुष्माभिः सर्वान्कामानवाप्नवा
नीतिनिनयन्नभिमंत्रयते ॥ समुद्रंवःप्रहिणोमिस्वांयोनि

हं मधुनो मधव्येन परमेण रूपेणान्नाद्येन परमो मधव्योन्ना
दोसानीति मधुमतीभिर्वा प्रत्यृचं पुत्रायांतेवासिने वोत्तरत आ
सीनायोच्छिष्टं दद्यात्सर्वं वा प्राश्नीयात्प्राग्वासंचरे निनयेदाचम्य
१ प्राणान्समृशति वाङ्म आ[illegible]नसोः प्राणोक्ष्णोश्चक्षुः कर्णयो
श्रोत्रं बाह्वोर्बलमूर्वोरोजोरिष्टानि मेंगानि तनूस्तन्वा मे सहे
त्याचांतोदकाय शासमादाय गौरिति त्रिः प्राह प्रत्याह माता रु
द्राणां दुहिता वसूनां ८ स्वसादित्यानाममृतस्य नाभिः ॥

प्रनुवोचंचिकितुषेजनायमागामदितिंवधिष्ठ ॥ ममचामुष्यच
पाप्मानꣳ हनोमीतियद्यालभेताथयद्युत्सिसृक्षेन्ममचामु
ष्यचपाप्माहतः ॐमुत्सृजततृणान्यत्त्वितिब्रूयान्नत्वेवामाꣳ
सोर्घःस्यादधियज्ञमधिविवाहंकुरुतेत्येवब्रूयाद्यद्यप्यसकृ
त्संवत्सरस्यसोमेनयजेतकृतार्घ्याएवैनंयाजयेयुर्नाकृता
र्घ्याइतिश्रुतेः॥३॥चत्वारःपाकयज्ञाः॥हुतोहुतःप्रहुतः 
प्राशितइतिपंचसुबहिःशालायांविवाहेचूडाकरणउपनयने

रिध[illegible]त्स्व वासइत्यथोत्तरीयं ग्रा ३ अयं तन्नक यं ग्रा ३ अतन्व

त ॥ याश्च देवीस्तंतूनभितोततंथ ॥ तास्त्वा देवी र्जरसे संव्य

१ यस्वायुष्मतीदं परिधत्स्व वासः इत्यथैनौ समंजयंति समंजंतु

विश्वेदेवाः समापो हृदयानि नौ ॥ सम्मातरिश्वा सं धाता समु

श्री दे[illegible]दधातु नाविति पित्रा प्रत्तामादाय गृहीत्वा निष्क्रामति य

देषि मनसा दूरं दिशोनुपवमानो वा ॥ हिरण्यपर्णो वै कर्णः ८

स त्वा मन्मनसां करोत्वित्यथैनौ समीक्षयत्यघोरचक्षुरपति

न्

त्वि

केशांतेसीमंतोन्नयनइत्येकपक्षउद्धृतावोक्षितेग्निमुपसमाधा
यनिर्मंथ्यमेकेविवाहेउदगयनआपूर्यमाणपक्षेपुण्याहेकुमा
र्याःपाणिंगृह्णीयात्त्रिषुत्रिषूत्तरादिषुस्वातौमृगशिरसिरोहि
ण्यांवातिस्रोब्राह्मणस्यवर्णानुपूर्व्येणद्वेराजन्यस्यैकावैश्यस्य
सर्वेषांशूद्रामप्येकेमंत्रवर्जमथैनांवासःपरिधापयति यात्रे॥
२९ जरांगच्छपरिधत्स्ववासोभवाकृष्टीनामभिशस्तिपावा।।शतंच
जीवशरदःसुवर्च्चारयिंचपुत्राननुसंव्ययस्वायुष्मतीदंप

ग

णपादेन प्रयस्योपविश्यपत्यन्वारब्धं आघारावाज्यभागौ
महाव्याहृतयः सर्वप्रायश्चित्तं प्राजापत्यं ६ स्विष्टकृच्चै
तं नित्यं ६ सर्वत्र माऽन्महाव्याहृतिभ्यः स्विष्टकृदन्यंच्चेदा
ज्याद्धविः सर्वप्रायश्चित्तं प्राजापत्यांतरमेतदावापस्था
नं विवाहे राष्ट्रभृतइच्छंजयाभ्यातानांश्च जानन्येन कर्म
णोछेदितिवचनात्तच्चित्तं च चित्तिश्चाकूतं चाकूतिश्च विज्ञा
तं च विज्ञातिश्च मनश्च शक्करीश्च दर्शश्च पौर्णमासं च

घ्येधि शिवा पशुभ्यः सुमनाः सुवर्चाः ।। वीरसूर्देवकामाः स्यो
ना शन्नो भव द्विपदे शं चतुष्पदे ।। सोमः प्रथमो विविदे गंधर्वो
विविद उत्तरीयो ग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः ।। सोमो ददद्गंध
र्वाय गंधर्वो ददद्ग्नये ।। रयिंच पुत्रांश्चा — दग्निर्मह्यमथो
इमां ।। सा नः पूषा शिवतमामेरय सा न ऊरू विश्मती विहर ।। य
स्यामुशंतः प्रहराम शेपं यस्यामु कामा बहवो निविष्ट्या इति ।। ४५
प्रदक्षिणमग्निं पर्य्याणयीयेके पश्चादग्नेस्तेजनीयं कटं वा दक्षि

स्वधारूपाणां। विष्णुः पर्वतानांमरुतोगणानामधिपतयः
स्तेमावंतुपितरः पितामहाः परेवरे ततास्ततामहाः ॥इ
हमावंतु अस्मिन्ब्रह्मण्यस्मिन्क्षेत्रेस्यामाशिष्यस्यांपुरो
धायामस्मिन्कर्मण्यस्यांदेवहूत्यां६ स्वाहेति सर्वत्रानुष
७ जत्यग्निरैतुप्रथमोदेवतानां८ सोस्यैप्रजामुंचतुमृत्यु
पाशात् ॥तदयं८ राजावरुणोनुमन्यतांयथेयं८ स्त्री
पौत्रमघंनरोदां स्वाहा ॥इमामग्निस्त्रायतांगार्हपत्य ७

वृहच्चरथंतरंचप्रजापतिर्ज्यैयानिंद्रायवृष्णेप्रायच्छदु
ग्रःपृतनाजयेषु॥तस्मैविशःसमनमंतसर्वाःसउग्रःस
इहव्योबभूवस्वाहेत्यग्निर्भूतानामधिपतिःसमावत्विं
द्रोज्येष्ठानांयमःपृथिव्यावायुरंतरिक्षस्यसूर्योदिवश्चं
द्रमानक्षत्राणांवृहस्पतिर्ब्रह्मणोमित्रःसत्यानांवरुणो
पाꣳ॰समुद्रःस्रोत्यानामन्नꣳ॰साम्राज्यानामधिपतिन्त
न्मावत्वनुसोमओषधीनाꣳ॰सविताप्रसवानाꣳ॰रुद्रःपशूना

कुमार्यो भ्राता शमीपलाशमिश्रांल्लाजानंजलिनांजला
वावपतितांजुहोतिसꣳहतेनतिष्ठत्यर्यमणंदेवंकन्याऽअ
ग्निमयक्षत ॥ सनोऽअर्यमादेवः प्रेतोमुचतुमापतेः स्वाहा ॥
इयंनार्युपब्रूतेलाजानावपंतिका ॥ आयुष्मानस्तुमेपतिरे
६ धंतांज्ञातयोममस्वाहा ॥ इमांल्लाजानावपाम्यग्नौसमृद्धि
करणंतव ॥ ममतुभ्यंचसंवननंतदग्निरनुमन्यतामियꣳ
स्वाहेत्यथास्यदक्षिणꣳहस्तंगृह्णातिसांगुष्ठंगृभ्णामिते ६

प्रजामस्यैनयतुदीर्घमायुः॥अपूर्ण्योपस्थाजीवताम
स्तुमातापौत्रमानंदमभिविबुध्यतामियꣳस्वाहा॥स्व
स्तिनोऽअग्नेदिवआपृथिव्याविश्वानिधेह्ययथायजत्र॥
यदस्यांमहिदिविजातंप्रशस्तंतदस्मासुद्रविणंधेहिचित्र
ꣳस्वाहा॥सुगंपंथांप्रदिशन्नएहिज्योतिष्मध्येह्यजरन्नऽ
आयुः॥अपैतुमृत्युरमृतंमऽआगाद्वैवस्वतोनोअभयं
कृणोतुस्वाहेतिपरंमृत्यवितिचैकेप्राशनांते॥५॥

णपादेनारोहेममश्मानमश्मेव त्वं स्थिराभव ॥ अभितिष्ठ पृ
तंन्यतोवबाधस्व पृतनायत ३ इत्यथ गाथां गायति सरस्वती प्रेद
मव सुभगे वाजिनीवती ॥ यां त्वा विश्वस्य भूतस्य प्रजायाम
स्याग्रतः ॥ यस्यां भूतं समभवद्यस्यां विश्वमिदं जगत् ॥ ता
मद्य गाथां गास्यामि या स्त्रीणामुत्तमं यशः ४ इत्यथ परिक्रामतस्तु
॥ ९ ॥ भ्यमग्ने पर्यवहन्त्सूर्यां वहतुना सह ॥ पुनः पतिभ्यो जायां दाग्नेः
प्रजया सह ॥ ये वेद्विर परं लाजादिचतुर्थं भूर्पकुर्यात्सर्वां ॥ ९ ॥

सौभगत्वायहस्तंमयापत्याजरदष्टिर्यथासः भगोअर्यमासविता
पुरंधिर्मह्यंत्वादुर्गार्हपत्यायदेवाः अमोहमस्मिसात्वꣳसात्व
मस्यमो३अहं ।। सामाहमस्मि — — त्वंद्यौरहंपृथिवीत्वं ।। तावे
हिविवाहवहैसहरेतोदधावहै ।। प्रजांप्रजनयावहैपुत्रान्विंद्या
वहैबहून् ।। तेसंतुजरदष्टयः संप्रियौरोचिष्णूसुमनस्यमा
नौ ।। पश्येमशरदः शतंजीवेमशरदः शतꣳशृणुयामशरदः
शतमिति ।। ६ ।। अथैनामश्मानमारोहयत्युत्तरतोग्नेर्दक्षि

॥१७॥ तमास्तांस्ते कृण्वंतु भेषजमित्यापो हि ष्ठेति तिस्रभिरथैनाꣳ सूर्य
मुदीक्षयति तच्चक्षुरित्यथास्यै दक्षिणाꣳ समधि हृदयमालभते
मम व्रते ते हृदयं दधामि मम चित्तमनु चित्तं तेऽस्तु ।। मम वाचमेक
मना जुषस्व प्रजापतिष्ट्वा नियुनक्तु मह्यमित्यथैनामभिमंत्रयते ।।
सुमंगलीरियं वधूरिमाꣳ समेत पश्यत ।। सौभाग्यमस्यै दत्त्वायाथा
स्तं विपरेतनेति तां दृढपुरुषोऽन्मथ्य प्राग्वोदग्वानुगुप्तागारऽआनु
७च डुहे रोहितेऽर्मण्युपवेशयतीह गावो निषीदंत्विहाश्वा इह पूरुषाः ।।

ह्लाजानाव पतिभगायस्वहेति त्रिः परिणीतां गांजापस्थ६ः हुत्वा ॥ ७ ॥ अथैनामुदीची६ः सप्तपदानि प्रक्रामयत्येकमिषे द्वे ऊर्ज्जे त्रीणि रायस्पोषाय चत्वारि मयोभवाय पंच पशुभ्यः षड्ऋतुभ्यः सखे सप्तपदाभव सामामनुव्रताभव विष्णुस्त्वां नयत्विति सर्वत्रानुषजति निष्क्रमण प्रभृत्यदकुंभ६ः स्कंधेकृत्वा दक्षिणतोग्नेर्वाग्यतः स्थितो भवत्युत्तरतः ३ एकेषां नतः ३ एनां मूर्द्धन्यभिषिंचत्यापः शिवाः शिवतमाः शांताः शांत

३३ यीयातां॰ संवत्सरंनमिथुनमुपेयातांद्वादशरात्रं॰ षड्रात्रंत्रि
रात्रमंततः॥८॥उपयमनप्रभृत्यौपासनस्यपरीचरणमस्तमि
तामुदितयोर्दध्नातंडुलैरक्षतैर्वाग्नयेस्वाहाप्रजापतयेस्वाहे
तिसायं॰ सूर्यायस्वाहाप्रजापतयेस्वाहेतिप्रातःपुमां॰ सौमि
त्रावरुणौपुमां॰ सावश्विनावुभौ॥पुमानिंद्रश्चसूर्यश्चपुमां॰ सं
वर्ततांमयिपुनःस्वाहेतिपूर्वांगर्भकामाः॥९॥रात्रौक्षभेदनड्डवि
मोक्षेयानविपर्यासेन्यस्यांवाव्यापत्तौस्त्रियाश्चोद्वहनेतमेवा

इडोसहस्रदक्षिणोयज्ञऽइहपूषानिषीदंत्वितिग्राममवचनंच
कुर्युर्विवाहश्मशानयोर्ग्रामंप्रविशतादितिवचनात्तस्मात्तयो
र्ग्रामः प्रमाणमितिश्रुतेराचार्यायवरंददातिगौर्ब्राह्मणस्यवरोग्रामो
राजन्यस्याश्वोवैश्यस्याधिरथं६·शतंदुहितृमतेऽस्तमितेध्रुवंद
र्शयतिध्रुवमसिध्रुवंत्वापश्यामिध्रुवैधिपोष्येमयिमह्यंत्वादात्
बृहस्पतिर्मयापत्याप्रजावतीसंजीवशरदः शतमितिसायदिन
पश्येत्पश्यामीत्येवब्रूयात्त्रिरात्रमक्षारालवणाशिनौस्यातामधःशा

१२॥

स्यैनाशायस्वाहा ॥ वायोः प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्रा
ह्मणस्त्वा स्त्वा नाथकाम उपधावामि यास्य प्रजाघ्नीतनूस्तामस्यै
आशायस्वाहा ॥ सूर्यः प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्म
णस्त्वानाथकाम उपधावामि यास्य पशुघ्नीतनूस्तामस्यै नाशाय
स्वाहा ॥ चंद्रः प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा
नाथकाम उपधावामि यास्य ग्रहघ्नीतनूस्तामस्यै नाशायस्वाहा ॥
गंधर्वः प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वानाथ

ग्निमुपसमाधायाज्यं संस्कृत्येहरतिरितिजुहोतिनानामंत्राभ्यामं
न्ययानमुपकल्प्यतत्रोपवेशयेद्राजानं स्त्रियंवाप्रतिक्षत्रे इतिसु
शोनेनात्वाहार्षमीतिचैनयाधुर्यौदक्षिणाप्रायश्चित्तिस्ततोब्राह्मण
भोजनं ॥१७॥ चतुर्थ्यामपरात्रेभ्यंतरतोग्निमुपसमाधायदक्षिण
तोब्रह्माणमुपवेश्योत्तरतउदपात्रंप्रतिष्ठाप्यस्थालीपाकं अपयि
त्वाज्यभागाविष्ट्वाज्याहुतीर्जुहोत्यग्नेप्रायश्चित्तेत्वंदेवानांप्रायश्चित्ति
रसिब्राह्मणस्त्वानाथकामउपधावामियास्यैपतिघ्नीतनूस्ताम

यस्यहारेणनोपहासमिच्छेदुतस्येवंविसरोभवतितामुदुह्यस्थर्तु
१३ प्रवेशनंयथाकामीवाकाममाविजनितोः संभवामे।तिवचनादृर्था
स्यैदक्षिणा१. समधिहृदयमालेभतेषत्तेसुशीमेहृदयंदिविचंद्र
मसिश्रितं।।वेदाहंतन्मानविधात्पश्येमशरदःशतंजीवेमशरदः
शतं१. शृणुयामशरदःशतमित्येवंतेमेऊर्ध्वं।।१३।।पश्चादिषु
स्थालीपाक१. श्रपयित्वा।।दर्शपौर्णमासदेवताभ्योहुत्वाजु
हुतिब्रह्मणेप्रजापतयेविश्वेभ्योदेवेभ्योद्यावापृथिवीभ्यामितिवि
१३

कांमउपधावामिअस्यैयशोभीतनूस्तामस्यैनाशयस्वाहेति
स्थालीपाकस्यजुहोतिप्रजापतयेस्वाहेतिहुत्वाहुत्वैतासामा
हुतीनामुदपात्रेसꣳस्रवांत्समवनीयततः एनांमूर्द्धन्यभि
षिंचतियातेपतिघ्नीतँतँप्रजाघ्नीपशुघ्नीगृहघ्नीयशोघ्नीनिंदि
तातनूर्जारघ्नीततः एनांकरोमिसाजीर्यत्वंमयासहसाविश्व
थैनाꣳस्थालीपाकंप्राशयतिप्राणैस्तेप्राणान्त्संदधाम्यस्थिभि
रस्थीनिमाꣳसैर्माꣳसानित्वचात्वचमितितस्मादेवंवित्छ्रोत्रि

३४ न८॰स्त्रियापुष्पवत्याश्चतुराहादूर्द्ध्वं ८॰स्नात्वाविरजायास्तस्मि
न्नेवदिवा ऽ आदित्यंगर्भमित्यादित्यमवेक्षतेग्रहेवास्नापयित्वाना
मभिगच्छेदितिश्रुतेस्तस्मिन्नजायाः संभवकालेनिशायांकुर्याद्यदिदि
वामैथुनंव्रजेक्लीबा ऽ अल्पवीर्या ऽ अल्पायुषाश्चप्रजाप्रसूयंते
तस्मादेतद्वर्जयत्प्रजाकामोगृहीश्रुतिस्मृतिविरोधाभ्यांदक्षिणेनपा
णिंनोभावुरूप्रसार्यप्रजास्थानमभिमृश्यजपतिपूषाभग८॰सविता
मेदधातुरुद्रः कल्पयतीतिललाम८॰विष्णुर्योनिंकल्पयतुत्वष्टा ३४

श्वेभ्योदेवेभ्योबलिहरणंभूतगृह्येभ्यःआकाशायचवैश्वदेव
स्याग्नौजुहोत्यग्नयेस्वाहाप्रजापतयेस्वाहाविश्वेभ्योदेवेभ्यः
स्वाहाग्नयेस्विष्टकृतेस्वाहेतिप्राशनांतेबाह्यतस्त्रीबलिं १. ह
रतिनमःस्त्रियैनमःपुं १. सेवयसेवयसेनमःशुक्लायकृष्णा
यपापीनांपतयेनमोयेमेप्रजामुपलोभयंतिग्रामेवसंतःउतवा
रण्येतेभ्योनमोस्तुबलिमेभ्योहरामिस्वस्तिमेस्तुप्रजांमेददत्वि
तिशेषमद्भिःप्रप्लाव्यततोब्राह्मणभोजनं ॥१२॥ अथगर्भाधा

स्रू पाणिपि॰ डूतु ।। आसिंचतु प्रजापतिर्धाता गर्भं दधा
तु ते ।। गर्भं धेहि सिनीवालि गर्भं धेहि पृथुष्टुके ।।
गर्भं ते ऽश्विनौ देवावाधत्तां ।। पुष्करस्रजौ विति
तेजो वैश्वानरो दद्यादथ ब्रह्मानुमंत्रयते ब्रह्मा गर्भं
दधात्विति मा सुखो द सुखो वोपविश्यामथेंद्रे तो म
भमिति चैके स्नावणं कुर्वंति ।।१३।। अथर्तुमती जा
यामभिगम्य छलिंड पितृयज्ञेन यजेत ।। मध्यमपिंडं

पत्नी श्रा आतिपुत्रकामा ततऽद्दा तामाहुतिं जु
होऽया धत्त पितरऽ ईस्स कलकारमवर्जिभ्र्याऽयां
तुवऽई।ति जपित्वाहृदयमालभ्य एवं वत्सव्येनया
मिनोपस्थमभिमृशाजपतिभगमणेस्सारिनश्रामु
तेशानी।मितिरतोम्र भमितिसंधत्तेगायत्रेणे।तिमंत्रे
मंया।तिपुत्रकामो।भिगछेन्निस्य॥१४॥